नवम्बर २०२५ तः जनवरी २०२६ पर्यन्तम्
कार्तिक-शुक्ल-दशमी-तः माघ-शुक्ल-त्रयोदशी-पर्यन्तम्
(वैक्रमाब्दः-२०८२)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

( वर्षम्-१३-अङ्कः ४-६ )
(संयुक्ताङ्कः)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

एक साहित्यिक त्रैमासिक शोध पत्रिका
एवं
समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति
तथा
सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं
की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन–2278–8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 0170104000256 2285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

नवम्बर २०२५ तः जनवरी २०२६ पर्यन्तम्

वर्षम्-१३ अङ्कः-४-६
(संयुक्ताङ्कः)
(वै.-२०८२)

(कार्तिक-शुक्ल-दशमी-तः माघ-शुक्ल-त्रयोदशी पर्यन्तम्)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | श्रीजगन्नाथस्याखिलं मधुरम् | प्रो. बनमाली विश्वालः | १ |
| ३. | ईश्वरकृपा | डॉ. रामकिशोरमिश्रः | २ |
| ४. | विद्यारत्नम् अलौकिकम् | श्री अवनीशकुमारदीक्षितः (दिव्यः) | ३ |
| ५. | नानकं वन्दे जगद्गुरुम् | प्रो. शुकदेवः शर्मा | ४ |
| ६. | तस्मै श्रीगुरवे नमः | श्री प्रशान्तवर्मा | ५ |
| ७. | सूर्यः | डॉ. देवीसहायपाण्डेयः | ६ |
| ८. | धेनुः | डॉ. देवीसहायपाण्डेयः | ६ |
| ९. | चन्द्रः | डॉ. देवीसहायपाण्डेयः | ७ |
| १०. | नभसि तारकः | डॉ. देवीसहायपाण्डेयः | ७ |
| ११. | शिवः - शून्यात् पूर्णत्वम् | डॉ. धनञ्जयकुमारमिश्रः | ८ |
| १२. | आधुनिक शिक्षानीतिः संस्कृतञ्च | श्री अजय-आनंदः | १० |
| १३. | तच्चेतसा स्मरति नूनम् | सुश्री मनीषा एम. | ११ |
| १४. | छंदो मुक्त-काव्यं-तृषा | कालिन्दी परीखः | १२ |
| १५. | 'सति सप्तमी' प्रयोग शिक्षणम् | डॉ. हर्षदेवमाधवः | १३ |
| १६. | भव त्वम् (सन्नन्तप्रतिपदिकशिक्षणम्) | डॉ. हर्षदेवमाधवः | १४ |
| १७. | स्वादिधातु शिक्षणम् (अनुष्टुप) | डॉ. हर्षदेवमाधवः | १५ |
| १८. | शुभा विद्या | डॉ. हर्षदेवमाधवः | १६ |
| १९. | शिशु-शयन-गीतिका (लोरी) | डॉ. युवराजः भट्टराई | १७ |
| २०. | नियतिः एव बलीयसी | डॉ. सौ. शारदा-रमेश-गाडगे | २० |
| २१. | श्रीमच्छङ्करस्य कार्यम् | डॉ. केशवरामः शर्मा | २३ |


दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 23637798

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | ₹25 रूप्यकाणि |
| वार्षिकम् | : | ₹250 रूप्यकाणि |

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः अन्तरर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

## अयि गीर्वाणवाणीसमुपासकाः सुहृदयाः!

वृक्षेभ्यः पुरातनपत्राणां पतनक्रमे नवीनाः अङ्कुराः जगति प्रफुल्लितुं सज्जाः तथा च पूर्णविकासं प्राप्तुं पूर्वं शरद–शिशिरयोः स्वागताय च सज्जाः वर्तन्ते। पुष्पफलच्छायादिभिः सह वृक्षाः निःस्वार्थतया जीवनप्रदं वायुं प्रदातुं स्वकर्तव्यं निर्वहन्ति। परन्तु प्रकृतेः निःस्वार्थसेवायाः शोषणं दुरुपयोगं च कुर्वन्ति मानवाः स्वार्थलोभेन प्रेरिताः। सर्वत्र प्रदूषणं प्रचण्डं वर्तते, येन मानवाः स्वप्राकृतिकसम्पदां पूर्णतया भोक्तुं न शक्नुवन्ति, यस्योत्तरदायिनः त एव वर्तन्ते। प्रकृते विविधाः औषधगुणाः वृक्षाः, कल्लोलिन्यः, गिरयः, नीरनिधयः, नभश्च सर्वेऽपि अनेकतः निःस्वार्थभावेन मानवानां प्राणीनाञ्च कृते जीवनमूल्यानि तत्त्वानि प्रददति। यदि वयमपि प्रकृतेः त्यागपूर्वकमुपभोगं कुर्मः पोषयामः प्रकृतेः प्राणप्रदं तत्त्वं आत्मसातवन्तः च, तर्हि अस्माकं जीवनेऽपि गुणसमृद्धिं भविष्यति।

संस्कृताध्येतॄणां विद्यार्थीनां समक्षं संस्कृतचन्द्रिका–मासिकी–बालपत्रिकायाः त्रयोदशतममवर्षस्य नवम्बर २०२५ तः जनवरी २०२६ पर्यन्तमम् ई–पत्रिकारूपेण प्रकाशितः संयुक्ताङ्कः(१३/४–६) सर्म्पयते। संयुक्ताङ्केऽस्मिन् प्रो. बनमालीविश्वालमहादेयानां, डॉ. रामकिशोरमहोदयानां, डॉ. शुकदेवशर्ममहोदयानां, श्रीप्रशान्तवर्ममहोदयानां, डॉ. देवीसहायपाण्डेयमहोदयानां, डॉ. धनञ्जयकुमारमिश्रमहोदयानां, श्रीअजय–आनन्दमहोदयानां, सुश्रीमनीषामहोदयानां, सुश्रीकालिन्दीपारीखमहोदयानां, डॉ. हर्षदेवमाधव महोदयानां, श्रीओम्प्रकाशठाकुरमहोदयानां, डॉ. सौ. शारदारमेशगाडगेमहोदयानां तथा च डॉ. केशवरामशर्ममहोदयानां कतिपयाः बालोपयोगिरचनाः विद्यार्थीनां जिज्ञासूपाठकानां च कृते प्रकाशिताः याः अतीव रोचकाः संस्कृते रुचिवर्धकाश्च वर्तन्ते। लेखकैः अपि अनुरोधः क्रियते यत् बालकेषु सृजनशीलतां भाषाकौशलं च वर्धयितुं नूतनानि लेखनानि प्रेषयन्तु। आशासे बालपत्रिकेयं बालकैः सोत्साहं च पठिष्यत इति।

शकाब्दः १९४७ (मार्गशीर्ष–कृष्ण–एकादशी)
(उत्पन्ना–एकादशी)

निवेदकः
**( शैलेन्द्रकुमारसिंहः )**
सचिवः

# श्रीजगन्नाथस्याखिलं मधुरम्

-प्रो० बनमाली विश्वालः*

कृष्ण-कोकिलस्य 'कूहु'र्मधुरम्,
'झर-बकुलस्य' मधु मधुरम् ॥१॥
कलाकृष्ण-सम्भाषणं मधुरम्,
कृष्णमाणिक्यस्य प्रेम मधुरम् ॥२॥
कथा मधुरा कटाक्षो मधुरः,
मधुरा यमुना जलं मधुरम् ॥३॥
मधुरञ्च केलि-कदम्बमूलम्
मधुरोऽपि मोहनवंशीस्वरः॥४॥
मधुरा तस्यास्ति पुराण-पुस्ती
मधुरा तस्य गीता भागवती ॥५॥
मधुराः मधुरास्ताः गोपा-बालाः,
मधुराश्च पुनस्ते गोप-बालाः ॥६॥
मधुरा गोपी मधुरा श्रीराधा
कुञ्जे रासलीलाऽपि सुमधुरा॥७॥
मधुरः स्पर्शः मधुरः सुवासः,
मधुरः जगन्नाथ-स्वर्णवेशः॥८॥
कृष्णगवां सखि! दुग्धं मधुरम्
श्रीं जगन्नाथस्याखिलं मधुरम् ॥९॥



* ५७, वसन्त विहारः, झूँसी, प्रयागराजः - २११०९९ उत्तरप्रदेशः

# ईश्वरकृपा

-डॉ. रामकिशोरमिश्रः*

ईश्वर! ते कृपा बह्वी, त्वयाऽहं मनुष्यः कृतः।
दुग्धं पातुं त्वया मातुः स्तनाः पयसा पूरिताः॥

भक्षयितुं मुखं दत्तं, घ्रातुं दत्ता च नासिका।
श्रोतुं च प्रदत्तौ कर्णौ, द्रष्टुं च दत्ते चक्षुषी॥

कार्याय च करौ दत्तौ, चलितुं चरणौ तथा।
ज्ञानाय प्रदत्ता बुद्धिर्जिह्वा मे भजनाय च॥

आहाराय दत्तमन्नं गोधूमाश्चणका यवाः।
शौचस्नानक्षालनेभ्यो जलं दत्तं पानाय च॥

कीर्तनाय प्रदत्ता वाक् लिखितुं मे च लेखनी।
मेलितुं दत्तः सत्सङ्गो रमणी रमणाय मे॥

भोजनाय दत्ता पत्नी पालनाय च बालकाः।
सेवायै मातापितरौ दानाय प्रभोर्मन्दिरम्॥

कर्मणे परोपकारः सदाचारश्च सन्मतिः।
रामकिशोरमिश्रेण, ईश्वरकृपा वर्णिता॥



*द्वारा श्री सौरभमिश्रः, २९५/१४ पट्टीरामपुरम्, खेकड़ा-२५०१०१ जनपदम्-बागपत (उत्तरप्रदेशः)

# विद्यारत्नम् अलौकिकम्

-अवनीशकुमारदीक्षितः 'दिव्यः'*

विद्यया परमं श्रेयं विद्यया परमं सुखम् ।
विद्यया परमं रूपं विद्यया परमं गुणम् ॥१॥

विद्यया पालिता भाषा विद्यया क्षालिता सुधा ।
विद्यया घालितं जाड्यं विद्यया चालितं जगत् ॥२॥

विद्यया पूजितः कोऽपि विद्यया एव मानितः ।
प्राप्तव्यं तर्हि केनापि विद्यारत्नम् अलौकिकम् ॥३॥

विद्यया राजते दीनः विद्यया राजते धनी ।
विद्यया राजते शीलं विद्यया राजते सुखम् ॥४॥

विद्या मनुष्येषु सदैव पूज्या विद्या मनुष्येषु सदैव मान्या ।
विद्या मनुष्येषु सदैव प्राप्या विद्या मनुष्येषु सदैव धार्या ॥५॥



विद्यया लभते कीर्तिं विद्यया लभते धनम् ।
विद्यया लभते सौख्यं विद्यया लभते क्षमा ॥६॥

विद्यया लभते शौचं विद्यया लभते यशः ।
विद्यया लभते मानं विद्यया लभते शुभम् ॥७॥

विद्यावान् च विवेकी च विनयी च विचारकः ।
न गच्छति विकारान् सः अविकारी अलौकिकः ॥८॥

विद्यावान् विनयी योऽस्ति बलवान् च अनुद्धतः।
क्रियावान् अनहंवादी स मनुष्यो विचक्षणः ॥९॥

विद्या विस्तारिता यस्य क्रिया लोकोपकारिणी ।
वचनं मधुरं चापि स मनुष्यो प्रशंसितः ॥१०॥

---

*१/३ , ए ५, अष्टविनायकः, सेक्टर -१५, ऐरोली, नवी मुंबई ४००७०८, महाराष्ट्रम्

# नानकं वन्दे जगद्गुरुम्

-प्रो. शुकदेवः शर्मा*

विषयेषु निरासक्तमात्मतत्त्वगवेषकम्।
गुरुं ब्रह्मस्वरूपिणं नानकं वन्दे जगद्गुरुम् ॥१॥
ज्ञानिधुरन्धरं सिद्धं सत्यज्ञानपरायणम्।
तत्त्वज्ञानीं क्षमाशीलं नानकं वन्दे जगद्गुरुम् ॥२॥
द्वन्द्वातीतं भवातीतं गोविन्दसमुपासकम्।
भवभयापहर्त्तारं नानकं वन्दे जगद्गुरुम् ॥३॥
श्वेताम्बरावृततनुं समाधौ निरतं प्रभुम्।
अपूर्वां ज्ञानमूर्तिं हि नानकं वन्दे जगद्गुरुम् ॥४॥
स्नेहसौख्यपरीतात्मानं परमात्मनिष्ठं सुधीम्।
सिद्ध-सन्तशिरोमणिं नानकं वन्दे जगद्गुरुम् ॥५॥
निरवद्यं निराकाङ्क्षं सर्वसाक्षीं यतेन्द्रियम्।
ज्ञाननिर्धूतकल्मषं नानकं वन्दे जगद्गुरुम् ॥६॥
निर्विशेषमुदासीनं विभवेषु निरुत्सुकम्।
वैराग्यकृतबुद्धिञ्च नानकं वन्दे जगद्गुरुम् ॥७॥
विगतस्पृहं भूतेशं शोकापगतमानसम्।
अध्यात्मनित्यं जिज्ञासुं नानकं वन्दे जगद्गुरुम् ॥८॥
सिद्धार्थं सिद्धसंकल्पं सिद्धं सिद्धिप्रसाधकम्।
सिद्धेश्वरं सिद्धमणिं नानकं वन्दे जगद्गुरुम् ॥९॥
निगमागमपथजुषं श्रेयसां परमां निधिम्।
मर्दानेन सदासेव्यं नानकं वन्दे जगद्गुरुम् ॥१०॥
स्थिरबुद्धिमसम्मूढं ब्रह्मविद् ब्रह्मणि स्थितम्।
'श्रीचन्द्र'सूनुसहितं नानकं वन्दे जगद्गुरुम् ॥११॥



*अतिथि-आचार्यः, विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्, साधु-आश्रमम्, होशियारपुरम्-१४६०२१

# तस्मै श्रीगुरवे नमः

-प्रशान्तवर्मा*

बहुजन्मसु पुण्यानाम्, सम्प्राप्तं यस्य सञ्चयात्।
स्नेहमधुरसान्निध्यम्, तस्मै श्रीगुरवे नमः ॥१॥
अज्ञानतमसाच्छन्ने, शिष्यकेऽस्मिंस्तु मादृशे।
वर्षितं येन कारुण्यम्, तस्मै श्रीगुरवे नमः ॥२॥
त्यागभास्वरमूर्तिर्यः सर्वशास्त्रमुखोत्पलः।
वीतस्पृहः प्रचारेषु, तस्मै श्रीगुरवे नमः॥३॥
अविचिन्त्यमहत्त्वो यः, यो वै सत्त्वगुणाशयः।
दुर्लभस्तु त्रिलोकेषु, तस्मै श्रीगुरवे नमः॥४॥
सेवितुं कृतचेष्टो यम्, प्रलब्धावसरोऽप्यहम्।
न कदाचन दौर्भाग्यात्, तस्मै श्रीगुरवे नमः॥५॥
समुद्रवद् विशालो यः, हिमाद्रिवत् समुन्नतः।
गगनवदसीमश्च, तस्मै श्रीगुरवे नमः॥६॥
यः स्वनामा क्षमाधारः, स्वानुभूतिप्रभोज्ज्वलः।
तथाप्राकृतजन्मा च, तस्मै श्रीगुरवे नमः॥७॥
परब्रह्मणि लीनो यः, देहपातादनन्तरम्।
सच्चिदानन्दरूपे च, तस्मै श्रीगुरवे नमः॥८॥



* देशप्रियपल्ली, कालियागञ्जः, उत्तरदिनाजपुरमण्डलम्, पश्चिम बङ्गप्रदेशः

## सूर्यः

-डॉ. देवीसहायपाण्डेयः*

सूर्यो जगज्जीवनं दाता।
सूर्यः संसारस्य विधाता।।
जगत्प्रेरकः सर्वाधारः।
गायत्रीमन्त्रस्याधारः।।
सूर्यः पिता तथैवसुमाता।
सूर्यो जगज्जीवनं दाता।
रात्रिं दिनञ्च सूर्यः रचयति।
ऋतुचक्रं रविरेवं सर्जयति।।
सूर्य एव वारिद निर्माता।
तेन हि भूमौ वृष्टिर्जाता।
सूर्यो हि प्रत्यक्ष देवता
वंद्यः प्रथमोजगतस्त्राता।
सूर्यो जगज्जीवनं दाता।।



## धेनुः

सरलाधिकं मन्यते धेनुः।
अति गुणवती गण्यते धेनुः।
खादति तृणं ददाति सुदुग्धं।
माता यथा पूज्यते धेनुः।
कृष्णा श्वेता रक्तिमवर्णा।
बहुवर्णेषु दृश्यते धेनुः।।
गुणगौरवं विलोक्य विशिष्टं।
देवैरपि सुवंद्यते धेनुः।।



* द्वारा श्री मनीषचन्द्रपाण्डेयः, लवकुशनगरम्, रामघाटः, अयोध्या, उत्तरप्रदेशः-२४१३३

## चन्द्रः



गगने मुदितो विचरति चन्द्रः।
मोदमोदकं विचरति चन्द्रः॥
नीलनभसि तारकदल मध्ये।
यथा मरालः प्रतरति चन्द्रः॥
तारकसभायां भूपतिरिव।
मुदितमनस्को विचरति चन्द्रः॥
ज्योत्सनाहासः प्रसरति परितः।
परं प्रमत्तो नृत्यति चन्द्रः॥

## नभसि तारकः



उच्चैर्दीव्यति नभसि तारकः।
दिव्यदीप इव तमसि तारकः॥
गगनतरोः पुष्पमिव भव्यं।
चित्तं कस्य न हरति तारकः॥
विलसति विकसितकमलं सदृशं।
निर्मलनभसः सरसि तारकः॥
नभो दीपयति हीरक कण इव।
अतुलित शोभां भरति तारकः॥
चन्द्रसभाया यथा सदस्यः।
चन्द्रमसं अनुसरित तारकः॥

# ''शिवः - शून्यात् पूर्णत्वम्''

-डॉ. धनञ्जयकुमारमिश्रः*

यदा सृष्टिर्नासीत्, यदा शब्दोऽपि मौनवानासीत्, यदा कालचक्रं स्थिरं स्थितमासीत्- तदा अपि शिवः आसीत्।
शिवः इति शब्दः कल्याणं, शुभता, शान्तिः, अनन्तचेतना च सूचयति।
न तस्य आदिः, न च अन्तः।
स केवलं देवः न, अपि तु भारतीयदर्शनस्य आत्मैव।
शैवदर्शनम् अस्मान् शिक्षयति - शिवः एव ब्रह्म, शिवः एव आत्मा च।
शिवः न केवलं मन्दिरे, न बहिः; स सर्वत्र - सर्वभूतेषु, सर्वकणे, सर्वश्वासे च।
स निर्गुणः अपि, सगुणः अपि।
स ध्यानस्थः अपि, नटराजः सन् ताण्डवं करोति।
स भस्मालेपितवैरागी अपि, पार्वत्याः सह गार्हस्थ्यजीवनं यापयति।
शिवस्य प्रत्येकं रूपं किञ्चिद् शिक्षयति-
त्रिनेत्रम् - ज्ञानं, चेतना, भविष्यदृष्टिः।
जटासु गङ्गा - जीवनसमत्वकला।
सर्पहारः - भयातीतता।
चन्द्रमा - सौम्यता, शीतलता च।
त्रिशूलः - इच्छाशक्तिः, क्रियाशक्तिः, ज्ञानशक्तिश्च।
तुलसीदासः वदति - 'नमामीशमीशान निर्वाणरूपं,
विभुं व्यापकं ब्रह्म वेदस्वरूपम्'-
अर्थात् अहं तं नमामि यः सर्वत्र व्याप्यते,
यो वेदानामपि पारम् गतः।
शिवताण्डवस्तोत्रे रावणः लिखति -
'जटाटवीगलज्जलप्रवाहपावितस्थले....................'
यत्र शिवस्य सौन्दर्यं सामर्थ्यं च एकत्र दृश्यते।
डमरुध्वनिः, गङ्गाप्रवाहः, सर्पमाला - एते सर्वे ताण्डवस्य जीवनम्।
एषः ताण्डवः केवलं विनाशः न, अपि तु नूतनसृष्टेः आरम्भः।
शिवः सरलः, भक्तवत्सलः।

---

*संस्कृत-विभागाध्यक्षः,सिदो-कान्हू-मुर्मू-विश्वविद्यालयः, दुमका, झारखण्डः।

नास्य बहवः मन्त्राः आवश्यकाः, न च कठिनविधिः - केवलं श्रद्धा, भक्तिः च।
एकः बिल्वपत्रः, एकः जलधारः, एकः सच्चभावः - एषैव तस्य पूजा।
काश्मीरीशैवदर्शने - 'सोऽहम्' इति वचः प्रसिद्धम् - अहमेव सः, अहमेव शिवः।
मोक्षः न दूरस्थः, किन्तु आत्मज्ञानरूपे अन्तरे एव।
मनः शान्ते, आत्मा स्थिरे - शिवः अनुभूयते।
शिवः अस्मान् शिक्षयति - ध्यानस्थतां, वैराग्ये जीवनम्, क्रोधे करुणां, विनाशे सृष्टिबीजं च।
स वदति - 'मौनम् अपि भाषा, शून्येऽपि सर्वम् अस्ति।'
शिवज्ञानाय श्रद्धैव आवश्यकम्।
यत्र प्रेम, यत्र भावः - तत्रैव शिवः।

**'ॐ नमः शिवाय'**



# आधुनिक शिक्षानीतिः संस्कृतञ्च

-अजय-आनन्दः

समाजः परिवर्तनशीलः अस्ति। यथा खानपानेषु, वस्त्रप्ररिधानेषु, भूषणेषु परिवर्तनं जातं, तथा वर्तमाने शिक्षानीत्यामपि परिवर्तनं जातम्।

प्राचीनसमये ''गुरुकुलव्यवस्था'' आसीत्। बालकाः स्वगृहं परित्यज्य गुरुकुलेषु आश्रमेषु वसन्ति स्म। गुरुकुलेषु शिक्षा प्राप्य गुरुवे गुरुदक्षिणां दत्वा, स्वगृहं प्रत्यागच्छन्ति स्म। पुरा गीतादिग्रन्थानां पठनम्, आवश्यकम् आसीत्।

वर्तमानसमये शिक्षानीत्यां महत् परिवर्तनमभवत्। अधुना कोऽपि बालकः गुरुकुलं न गच्छति। गुरुशिष्यपरम्परा विलुप्ता इव। अधुना अभिभावकाः बालकं आयुः तृतीये वर्षे एव पाठशालां प्रेषयन्ति। पठनस्य माध्यममपि द्विविधम् अस्ति। केचन छात्राः आंग्लभाषायाम् पठन्ति, केचन च हिन्दीभाषायाम्। आंग्लभाषायाः अध्ययनं प्राथमिकशालाषु अपि अनिवार्यं वर्तते। राजकीयशालासु, शासकीयशालासु, पठनमूल्यं नाममात्रमस्ति, किन्तु सार्वजनिकाषु निजशिक्षणसंस्थानेषु पठनशुल्कम् अधिकम् अस्ति। धनिकानां बालकाः एव तत्र पठित्वं शक्नुवन्ति।

अधुना प्राथमिकशालासु विद्याध्ययनेन सह अन्याः कलाः अपि पाठ्यन्ति। क्रीडनाय अपि प्रोप्त्साहयन्ति। विश्वविद्यालये विद्यार्थिनः छात्रावासेषु पठनार्थं वसन्ति। एतदर्थं मातापितरौ अल्पमेव धनं दातव्यं भवति।

छात्रावासेषु अध्ययनं कुर्वतां छात्राणां कृते भारतसर्वकारः आर्थिकसहायमपि ददाति। किन्तु अस्माकम् एतत् दुर्भाग्यं यत् कतिपयाः युवकाः अत्र पठित्वा विदेशं गच्छन्ति। तेषां ज्ञानस्य उपयोगः अन्यत्र भवति। यदि स्वदेशवासिनः तेषां ज्ञानस्य लाभः लभन्ते, तर्हि इयं शिक्षानीतिः सफला वर्तते। अधुना वयं राष्ट्र-प्रवृत्तिषु न सन्नद्धाः। अस्मासु विदेशसंस्कृत्याः प्रभावः जातः। किन्तु वयं स्वसंस्कृतिं न विस्मरेम।

महापुरुषाणाम् उपदेशपूरकानि पुस्तकानि पाठशालासु निर्धारयित्यानि। तेषाम् अध्ययनेन विद्यार्थिनः न केवलं विद्यावन्तः भवेयुः अपितु सदाचारिणः, देशभक्तः अपि भवेयुः। अतः पाठ्यक्रमे नैतिकशिक्षायाः समावेशः अवश्यमेव कर्त्तव्यः।

* संस्कृत व्याख्याता, सर्वोदय-बाल-विद्यालयः, जीनतमहल, कमलामार्केट, नवदेहली

# तच्चेतसा स्मरति नूनम्

**-मनीषा एम.***

अद्य अहं समयात् पूर्वम् एव स्टेशन् प्राप्तवती..........................

इन्टर्सिटी प्रात: ७.१० वादने अस्ति चेदपि अहं ४:५० वादने बसयानं गृहीतवती, यत: मम गृहस्य सम्मुखमेव आरोढुं शक्नोमि। पूर्वेद्यु: विवाहोत्सव: सानन्दं निर्वर्तित:।

......... परन्तु आयोजनानन्तरं यदा सर्वे बान्धवा: भगिन्यश्च निवृत्ता: तदा मां एकाकिता भृशं अबाधत। कथञ्चित् तावत् पर्यन्तं निरुद्धं दु:खशतं शनै: बहि: निरसरत्। अत एव ज्येष्ठमातु: सकाशे ११ वादने एव शयितम् इति अनृतमवोचम्। परं रुदन्ती एव कदापि निद्रावशं गता।

सुखस्वाभावात् अननुभूतपूर्वया शिरोवेदनया पीडिताऽहं रेलनिलये कुतश्चिदापणात् काफीं क्रीत्वा कुत्रापि उपवेष्टुकामा अभ्रमम्। रिक्तम् आसनं कुत्रापि न लब्धम्। अन्तत: यानारोहणस्थाने एव आसनं लब्धम्। तोषेण ससुखम् उपाविशम्। अहो दैवगति: कीदृशी। आर्तिसहस्रे सत्यपि कीदृशा: सुखलवा: परापतन्ति।

रेलनिलये महान् जनसम्मर्द्द:। किन्तु मदीयं मन: विचारसागरे मग्नं प्रमथितं च। अहं अचिन्तयं, "किम् एतत्? चतु:पञ्चवर्षेभ्य: ये कथमपि विचारा: निरुद्धा:, ते सर्वे अधुना सर्वं संरोधं भित्वा बहि: प्रवहन्ति।"

एवं, काफीं सम्यक् स्वदन्त्या: मम श्रद्धा कस्याञ्चन बालिकायां लग्ना। तत्समीपे मातापि स्थिता। बालिकाया: सुन्दरं मुखं ... चूर्णकुन्तलै: ईशत् छादितं नयनयुगलम्.......... सा मातरं किमपि याचति स्म। कृशा दीर्घगात्रा च सा माता, तस्या: याचनां अपश्यन्तीव हसति स्म।

अन्ते सा बाला क्षुब्धा रोदितुम् आरभता। तस्या: हस्तगतानि काचकङ्कणानि क्रोधावेगेन दूरं क्षिक्षेप। पुत्र्या: केलिं दृष्ट्वा हसन्ती माता सहसा क्रुद्धा भूत्वा तां प्रहर्तुं प्रवृत्ता। बालिका तु तस्या: तादृशं अप्रतीक्षितं प्रहारं असोढ्वा स्तब्धा अभूत्। क्षणमात्रेण मातु: क्रोध: दूरं गत:। सा तनयां हस्तयो: उद्धृत्य समलालयत्।

रेलयानागमनघोषणं श्रुतम् ... यानमागतम्। अतिकोलाहल: आसीत्। यथाकथञ्चित् आरुह्य वातायनसमीपे एकस्मिन् आसने उपाविशम्। पालक्काड्त: आरभ्य ओट्टपालम् यावत् रेलयात्रा कमनीयै: दृश्यै: सुमनसां मनांसि हडात् हरति इत्येतत् उक्तिं विना गम्यते। प्राय: सन्दर्भान्तरेषु ईदृशानि रमणीयानि दृश्यानि स्वदितुमेव मन: ह्लादयति। अधुना तु किञ्चिदिव दुन्वन्तीव। सा माता सा बालिका तयो: रूपं मदीयात् चेतस: नापैति स्म।

अकस्मात् भूतपूर्व: वृत्तान्तविशेष: स्मृतिपथमागत: ....... कदाचिदहं मम मात्रा सह कमलतडागे स्नानार्थं गतवती। केनापि कारणेन क्रुद्धा अभूवम्। पित्रा पूर्वदिने प्रेम्णा क्रीत्वा दत्तानि काचकङ्कणानि सुदूरं क्षिप्तं मया। प्रकुपिता प्रसू: मां अत्यर्थं प्राहरत्।

तावता रेलयानं शोर्नुर्-नगरं प्राप्तम्। घोषणामध्ये च त्वरितगत्या धावन्त: जना:। सर्वत्र कोलाहल: ... निर्गच्छन्तं अश्रुपातं कथञ्चिदपि निरोद्धुं अशक्ताहं खिन्ना उपाविशम्.....। काश्चन स्मृतय: काचखण्डकृतं व्रणमिव मन: तुदन्ति।

---

***शिवकृपा, विवेकानन्दनगरम्, कोल्लङ्कोटम्, पालक्काट्, केरलप्रदेश:**

# छंदो मुक्त-काव्यं-'तृषा'

-कालिन्दी परीखः*

न दीयतां नद्याः स्वप्नान्
मम भाग्ये तु मरुस्थलं लिखितम्
उष्ट्रः खर्जूरीद्रुमः तथा
वालुकाः
एतत् सर्वं मम वैभवम् अस्ति।
मरुप्रदेशे व्रजामि, चरामि।
मृगजलं वा
अश्रुजलं पीत्वा
मम तृषा प्रतिदिनं,
प्रतिरात्रि वर्धते।
मरुभूमौ चिरं विहृत्य
प्रविशामि पुनः
मरुभूमिम्।
जीवनं वा मरणं वा
सर्वम्
मे
खलु सिक्तासु।।



*३, देना बैंक सोसायटी, स्टेशन मार्गः, अमरेली, गुजरातप्रदेशः -३६५६०१

# बालगीतय:

## (१) 'सति सप्तमी' प्रयोग शिक्षणम्

-डॉ. हर्षदेवमाधव:*

जाते ब्राह्ममूहुर्ते भो: नित्यं जागृत बालका: ।
उदिते भास्करे योगं यूयं कुर्वन्तु सर्वदा ॥



कृते स्नाने सदा देवं प्रणमन्तु यशस्विन: ।
गुरौ दृष्टे प्रिया: शिष्या:! नमन्तु गुरुपादयो: ॥

जाते सूर्योदये प्रात: विकसन्ति जले तरौ ।
पङ्कजानि च पुष्पाणि डयन्ते खे विहङ्गमा: ॥

वर्षति भीषणे मेघे न्यपतन् पादपा भुवि ।
पतति विद्युति व्योम्नि अम्रियन्त जना: पुरे ॥

दुह्यमानासु संन्यासी गोषु श्रान्त: बहि: स्थित: ।
आगते श्रावणे भक्ता: अर्चन्ति श्रद्धया शिवम् ।
भीता: भेका: बके दृष्टे पलायन्ते नदीजले ॥

नष्टे शत्रौ भटा: वीरा: अवदन् 'जय भारतम्' ।
प्राप्ते च विजये वीरा: अनमन् राष्ट्रदेवताम् ॥

*८, राजतिलक बंगलो, आबादनगरम्, बस सांस्थानकस्य समीपे, बोपल:, अहमदाबाद:-३८००५८